CHUNILAL GANDHI VIDYABHAVAN
SURAT.

Manuscripts Library
S.2.P.13.
Coll. No. 641

Title Viṣayānanda

CHUNILAL GANDHI VIDYABHAVAN, SURAT

Shastri Dinmanishankar Pustak-Bhandara

No.: 641 Subject: Vedānta.

Title: Viṣayānanda.

Author: Vidyāraṅgamuni Scribe: Bhaṭa Mañchārāma

Date of the work: — Date of the Ms.: —

Place of the work: — Place of the Ms.: —

Size: 11.5" by 5" Extent: 5 foll.

Language: Sanskrit. Script: Devanāgari

Remarks: —

॥श्री॥ पंचमाध्यायस्य प्रतिपाद्यमर्थमाह॥ अथात्रेति॥ ननु विषयानंदस्य लौकिकत्वान्मोक्षशास्त्रे निरूपणम
नुपपन्नमित्याशंक्य तस्य लौकिकत्वप्रसिद्धत्वेपि ब्रह्मानंदैकदेशत्वेन ब्रह्मज्ञानोपयोगित्वाद्वक्ष्यमित्याह द्वा

अथात्र विषयानंदो ब्रह्मानंदांशरूपभाक्॥ निरूप्यते द्वारभूतस्तदंशत्वं श्रुतिर्जगौ॥१॥ एषोस्य
परमानंदो योऽखंडैकरसात्मकः॥ अन्यानि भूतान्येतस्य मात्रामेवोपभुंजते॥२॥ शांता घोरास्तथा मूढा
मनसो वृत्तयस्त्रिधा॥ वैराग्यं क्षांतिरौदार्यमित्याद्याः शांतवृत्तयः॥३॥ तृष्णा स्नेहो रागलो
भावित्याद्या घोरवृत्तयः॥ संमोहो भयमित्याद्याः कथिता मूढवृत्तयः॥४॥

रेति ब्रह्मानंदैकदेशत्वे किं प्र
माणमित्याशंक्याह॥ तदंशत्वमिति॥१॥ तामेव श्रुतिमर्थतः पठति एष इति॥२॥ इदानीं विषयानंदस्य ब्रह्मानं
दलेशत्वप्रदर्शनाय तदुपाधिभूतांतःकरणवृत्तिर्विभजते शांता इति शांताः सात्विक्यो वृत्तयः घोरा राजस्य १

मूढास्तामस्यः ता एव शांतादित्वेन त्रिधा दर्शयति वैराग्यमित्यादिना॥३।४॥ उक्तासु तासु त्रिविधास्वपि वृत्तिषु ब्रह्मणश्
चिद्रूपत्वं प्रतिभातीत्याह वृत्तिष्विति शांतास्व विशेषमाह शांतास्विति चशब्दश्चिद्रूपसमुच्चयार्थः॥५॥ उक्तार्थे

वृत्तिष्वेतासु सर्वासु ब्रह्मणश्चित्स्वभावता॥ प्रतिबिंबति शांतासु सुखं च प्रतिबिंबति॥५॥ रूपं रू
पं बभूवासौ प्रतिरूप इति श्रुतिः॥ उपमा सूर्यकेत्यादि सूत्रयामास सूत्रकृत्॥६॥ एक एव तु भूता
त्मा भूते भूते व्यवस्थितः॥ एकधा बहुधा चैव दृश्यते जलचंद्रवत्॥७॥ ॥

श्रुतिवाक्यमर्थतः पठति रूपमिति॥ तत्रैव व्याससूत्रैकदेशं पठति उपमेति अत एव चेति सूत्रस्य पूर्वभागः॥६॥ स्व
रूपेणैकस्योपाधिसंपर्कान्नानात्वे श्रुतिं पठति एक एवेति॥ ॥७॥ ॥ ॥

ननु निरवयवस्य ब्रह्मणः क्वचिच्चिन्मात्रभानमितरत्र चिदानंदभानमित्येवं विभागकरणमनुपपन्नमित्याशं-
क्य चंद्रदृष्टांतेन परिहरति जले प्रविष्ट इति॥८॥ तदेवोपपादयति घोरेति॥९॥ ननु चंद्रोपाधेरुदकस्य द्वैविध्या

जले प्रविष्टश्चंद्रोयमस्पष्टः कलुषे जले॥ विस्पष्टो निर्मले तद्वद्द्वेधा ब्रह्मापि वृत्तिषु॥८॥ घोरमूढा
सु मालिन्यात्सुखांशश्च तिरोहितः॥ ईषन्नैर्मल्यतस्तत्र चिदंशप्रतिबिंबनं॥९॥ यद्वापि निर्मले
नीरे वह्नेरौष्ण्यस्य संक्रमः॥ न प्रकाशस्य तद्वत्स्याच्चिन्मात्रोद्भूतिरत्र च॥१०॥ काष्ठे त्वौष्ण्यप्रकाशौ द्वा
वुद्भवं गच्छतो यथा॥ शांतासु सुखचैतन्ये तथैवोद्भूतिमाप्नुतः॥११॥

दंशाभानमुपपन्नं ब्रह्मणे तन्नोपाधिरंतःकरणस्यैकत्वादेकांशाभानमनुपपन्नमित्याशंक्य दृष्टांतांतर-
माह यद्वापीति॥१०॥ इदानीं शांतासु वृत्तिषु चिदानंदयोः प्रतीतौ दृष्टांतांतरमाह काष्ठे त्विति॥११॥ ॥ २

नन्वेवं व्यवस्था कुतः कल्प्येत्याशंक्याह वस्त्विति तत्र किं नियामकमित्याशंक्याह अनुभूतीति॥१२॥ अनुभूति
मेव दर्शयति न घोरास्विति शांतास्वपि आनंदप्रकाशोस्ति सोपि क्वचित्कश्चित्सुखातिशयो भवतीत्याह॥
शांतेति॥१३॥ पूर्वोक्तघोरमूढवृत्तिषु सुखाभावमेवाभिनीय दर्शयति गृहक्षेत्रेति॥ शांतास्वप्यानंदप्रकाशो

वस्तुस्वभावमाश्रित्य व्यवस्था तूभयोः समा॥ अनुभूत्यनुसारेण कल्प्यते हि नियामकं॥१२॥ न घोरा
सु न मूढासु सुखानुभव ईक्ष्यते॥ शांतास्वपि क्वचित्कश्चित्सुखातिशय ईक्ष्यतां॥१३॥ गृहक्षेत्रादिवि
षये यदा कामो भवेत्तदा॥ राजसस्यास्य कामस्य घोरत्वात्तत्र नो सुखं॥१४॥ सिध्येन्न वेत्यस्ति दुः
खमसिद्धौ तद्विवर्धते॥ प्रतिबंधो भवेत्क्रोधो द्वेषो वा प्रतिबंधके॥१५॥ ॥

स्ति सोपि क्वचित्कश्चिन्न वेति तत्र प्रतिकूलदुःखस्य सत्त्वादित्यर्थः॥१४॥ सुखासिद्धौ दुःखं वर्द्धते सुखस्य प्र
तिबंधे तु क्रोधो भवति सुखाभावे कारणांतरमाह॥ द्वेषो वेति॥१५॥ ॥

परिहारस्याशक्यत्वे विषादो भवति तस्यापि तामसत्वान्न तत्र सुखमित्याह अशक्येति क्रोधादिष्वित्यादयः स्पष्टा
र्थाः॥१६॥१७॥१८॥ एवं क्षांत्यादौ
नोसिद्धमित्याह वृत्तिष्विति॥१९॥

अशक्यस्येष्टतीकारो विषादः स्यात्स तामसः॥ क्रोधादिषु महद्दुःखं सुखशंकापि दूरतः॥१६॥ काम्यला
भे हर्षवृत्तिः शांता तत्र महत्सुखं॥ भोगे महत्तरं लाभप्रसक्तावीषदेव हि॥१७॥ महत्तमं विरक्तौ तु विद्यानं
दे तदीरितं॥ एवं क्षांतौ तथौदार्ये क्रोधलोभनिवारणात्॥१८॥ यद्यत्सुखं भवेत्तत्तद्ब्रह्मैव प्रतिबिंबनात्
वृत्तिष्वंतर्मुखास्वस्य निर्विघ्नं प्रतिबिंबनं॥१९॥ सत्ता चितिः सुखं चेति स्वभावा ब्रह्मणस्त्रयः॥ मृच्छि
लादिषु सत्तैव व्यज्यते नेतरद्वयं॥२०॥ सत्ता चितिर्द्वयं व्यक्तं धीवृत्त्योर्घोरमूढयोः॥ ॥

इदानीं सर्वत्र ब्रह्मस्वरूपानुभूति प्रदर्शनाय तत्स्वरूपं स्मारयन्
तिसत्तेति मृच्छिलादिषु सन्मात्रमित्यर्थः॥२०॥ घोरमूढयोः द्वयोः सत्ताचिती द्वे शांतवृत्तौ सच्चिदा॥ ॥ ३

नंदास्त्रयोऽपि व्यक्ताः॥ एवं सत्प्रपंचब्रह्माभिहितमित्याह मिश्रमिति॥२१॥ अमिश्रं कुतो ज्ञायत इत्याशंक्याह
अमिश्रमिति तौ च ज्ञानयोगौ पूर्वमेवोक्तावित्यर्थः कुत्रोक्तावित्याशंक्य योगः प्रथमाध्याय उक्त इत्याह आद्य
इति समनंतराध्यायद्वयोर्ज्ञानमुक्तमित्याह ज्ञानमिति॥२२॥ ननु सच्चिदानंदानां ब्रह्मरूपत्वे मायायाः किंरूप

शांतवृत्तौ त्रयं व्यक्तं मिश्रं ब्रह्मेत्थमीरितं॥२१॥ अमिश्रं ज्ञानयोगाभ्यां तौ च पूर्वमुदीरितौ॥ आद्येऽध्या
ये योगचिंता ज्ञानमध्याययोर्द्वयोः॥२२॥ असत्ता जाड्यदुःखे द्वे मायारूपं त्रयं त्विदं॥ असत्ता नरशृं
गादौ जाड्यं काष्ठशिलादिषु॥२३॥ घोरमूढधियोर्दुःखमेवं माया विजृंभिता॥ शांतादिबुद्धिवृत्त्यैक्यान्मिश्रं ब्र
ह्मेति कीर्तितं॥२४॥ ॥

मित्याशंक्याह असत्तेति नरशृंगादावसत्त्वं मृच्छिलादिषु जाड्यमिति विवेकः॥२३॥ दुःखं कुत्रेत्या
शंक्याह घोरमूढेति एवं सर्वत्र माया प्रतिभासत इत्याह एवमिति शांतादिवृत्तिषु ब्रह्मणो मिश्रत्वे किं कारणमित्यत
आह शांतादीति॥२४॥

ध्यानं०
५

एतदभिधानं किमर्थमित्याशंक्य ब्रह्मध्यानार्थमित्याह एवमिति नृशृंगादिस्वरूपेष्वनन्तब्रह्मध्यानं कर्तव्यमित्या
ह नृशृंगादिमिति ॥२४॥ अस्मत्वेतुक्ककुचकपथ्येयमिमनत आह शिलादाविति योरम्य स्वबुद्धिपुङ्गः स्वं परिस्व

एवं स्थिते ऽत्रयो ब्रह्म ध्यातुमिच्छेत्सुमानसौ ॥ नृशृंगादिस्वरूपेषु तेनं शिष्टं ध्यायेद्यथायथं ॥२५॥ शिला
दौ नाम रूपे देवस्का सन्मात्रचिंतनं ॥ त्यक्त्वा दुःखं घोरमूढधियोः सच्चिदिति चिंतनं ॥२६॥ शांतासु स
च्चिदानंदांस्त्रीनप्येवं विचिंतयेत् ॥ कनिष्ठमध्यमोत्कृष्टास्तिस्त्रश्चिंताः क्रमादिमाः ॥२७॥ मंदस्य व्य
वहारे ऽपि मिश्रब्रह्मणि चिंतनं ॥

असच्चिद्रूपेयोश्चिंतने कर्तव्यमित्याह त्यक्त्वेति ॥२६॥ सात्विकृष्टत्रि
पुतुसच्चिदानंदास्त्रयो ऽपिध्येया इत्याह शांतास्विति ॥ एषां ध्यानानां किं साम्यं नेत्याह ॥२७॥ इदानीं निर्गुणब्रह्मध्या
नेऽन ५

धिकारिणो ऽनुग्रहाय मिश्रब्रह्मध्याने ऽधिकार इत्यभिप्रायेणाह मंदस्येति ॥२८॥ एवं सद्दृष्टिकं ध्यानत्रयमुक्त्वा
ऽदृष्टिकं ध्यानमाह चैतन्यादिमित्यस्थिति एभ्यो ध्यानेभ्यो ऽधिकमित्यर्थः उक्तं निगमयति ध्यानमितिति ॥२९॥ अयं भा

उत्कृष्टं वकुमेवात्र विषयानंद ईरितः ॥२८॥ उदासीनस्तु धीहते शेषिस्याकुत्रमोत्तमं ॥ चिंतनं
वासनानंदो ध्यानमुक्तं चतुर्विधो ॥२९॥ न ध्यानं ज्ञानयोगाभ्यां ब्रह्मविद्यैव सा खलु ॥ ध्याने नैका
ग्र्यमापन्ने चित्ते विद्या स्थिरीभवेत् ॥३०॥ विद्यायां सच्चिदानंदा अखंडैकरसात्मतां ॥ प्राप्य भांति तु
भेदेन भेदकोपाधिवर्जनात् ॥३१॥ शांता घोराः शिलाद्याश्च भेदकोपाधयो मताः ॥ ॥ ॥

नावं तत्र भेदः किं नेत्याह न ध्यानमिति तर्हि किमेतदित्याशंक्याह ब्रह्मविद्येति इयं ब्रह्मविद्या कथमुत्पन्नेत्याशंक्या
ह ध्याने नेति ॥३०॥ ॥३१॥ भेदकोपाधिवर्जनादित्युक्तं तानेव भेदकोपाधीनाह शांता इति ॥ एतेषां परिहारः ॥ ॥

विषयानंद
५

केनोपायेनेत्याशंक्याह योगादिति ॥३२॥ फलितमाह निरुपाधीति त्रिपुटीभानाभावाद्ब्रह्मानंदस्तूच्यत इत्यर्थः
॥३३॥ ग्रंथमुपसंहरति । ब्रह्मानंदेति ॥३४॥ [illegible]ति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीभारतीतीर्थविद्यार

योगाद्विवेकतो वैषामुपाधीनामपाकृते ॥३२॥ निरुपाधिब्रह्मतत्त्वे भासमाने स्वयंप्रभे ॥ अद्वैते
त्रिपुटी नास्ति भूमानंदोऽत उच्यते ॥३३॥ ब्रह्मानंदाभिधे ग्रंथे पंचमोध्याय ईरितः ॥ विषयानंद ए
तेन द्वारेणांतः प्रविश्यतां ॥३४॥ प्रियाद्धरिहरोनेन ब्रह्मानंदेन सर्वदा ॥ पायाच्च पाणिनः सर्वा
न्स्वाश्रितान्शुद्धमानसान् ॥३५॥ ॥इति श्रीब्रह्मानंदे विषयानंदो नाम पंचमोध्यायः ॥५॥ ॥

ण्यमुनिकिंकरेण श्रीरामकृष्णाख्यविदुषा विरचितमुपदेशग्रंथविवरणे विषयानंदः पंचमोध्यायः ॥५॥ समाप्तोयं ५
ग्रंथ स्लोकसंख्या ८०० ॥ लीखितं भटमेनछारामशुभं भवतु ॥ नागरज्ञातिश्रीमीतरामपठनार्थं ॥ श्रीगुरुभ्यो नमः ॥